# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

## अध्याय ६९

निदर्शयित्वा रामाय सीतायाः प्रतिपादने ।
वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १॥

एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः ।
प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २॥

जम्बूप्रियालपनसाः प्लक्षन्यग्रोधतिन्दुकाः ।
अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३॥

तानारुह्याथवा भूमौ पातयित्वा च तान्बलात् ।
फलान्यमृतकल्पानि भक्षयन्तौ गमिष्यथः ॥ ४॥

चङ्क्रमन्तौ वरान्देशाञ्शैलाच्छैलं वनाद्वनम् ।
ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः ॥ ५॥

अशर्करामविभ्रंशां समतीर्थमशैवलाम् ।
राम सञ्जातवालूकां कमलोत्पलशोभिताम् ॥ ६॥

तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव ।
वल्गुस्वरा निकूजन्ति पम्पासलिलगोचराः ॥ ७॥

नोद्विजन्ते नरान्दृष्ट्वा वधस्याकोविदाः शुभाः ।
घृतपिण्डोपमान्स्थूलांस्तान्द्विजान्भक्षयिष्यथः ॥ ८॥

रोहितान्वक्रतुण्डांश्च नलमीनांश्च राघव ।
पम्पायामिषुभिर्मत्स्यांस्तत्र राम वरान्हतान् ॥ ९॥

निस्त्वक्पक्षानयस्तप्तानकृशानेककण्टकान् ।
तव भक्त्या समायुक्तो लक्ष्मणः सम्प्रदास्यति ॥ १०॥

भृशं ते खादतो मत्स्यान्पम्पायाः पुष्पसञ्चये ।
पद्मगन्धि शिवं वारि सुखशीतमनामयम् ॥ ११॥

उद्धृत्य स तदाक्लिष्टं रूप्यस्फटिकसंनिभम् ।
अथ पुष्करपर्णेन लक्ष्मणः पाययिष्यति ॥ १२॥

स्थूलान्गिरिगुहाशय्यान्वराहान्वनचारिणः ।
अपां लोभादुपावृत्तान्वृषभानिव नर्दतः ।
रूपान्वितांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम ॥ १३॥

सायाह्ने विचरन्राम विटपी माल्यधारिणः ।
शीतोदकं च पम्पायां दृष्ट्वा शोकं विहास्यसि ॥ १४॥

सुमनोभिश्चितांस्तत्र तिलकान्नक्तमालकान् ।
उत्पलानि च फुल्लानि पङ्कजानि च राघव ॥ १५॥

न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः ।
मतङ्गशिष्यास्तत्रासन्नृषयः सुसमाहिताः ॥ १६॥

तेषां भाराभितप्तानां वन्यमाहरतां गुरोः ।
ये प्रपेतुर्महीं तूर्णं शरीरात्स्वेदबिन्दवः ॥ १७॥

तानि माल्यानि जातानि मुनीनां तपसा तदा ।
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव ॥ १८॥

तेषामद्यापि तत्रैव दृश्यते परिचारिणी ।
श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी ॥ १९॥

त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम् ।
दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति ॥ २०॥

ततस्तद्राम पम्पायास्तीरमाश्रित्य पश्चिमम् ।
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि ॥ २१॥

न तत्राक्रमितुं नागाः शक्नुवन्ति तमाश्रमम् ।
ऋषेस्तस्य मतङ्गस्य विधानात्तच्च काननम् ॥ २२॥

तस्मिन्नन्दनसङ्काशे देवारण्योपमे वने ।
नानाविहगसङ्कीर्णे रंस्यसे राम निर्वृतः ॥ २३॥

ऋष्यमूकस्तु पम्पायाः पुरस्तात्पुष्पितद्रुमः ।
सुदुःखारोहणो नाम शिशुनागाभिरक्षितः ।
उदारो ब्रह्मणा चैव पूर्वकाले विनिर्मितः ॥ २४॥

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि ।
यत्स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ २५॥

न त्वेनं विषमाचारः पापकर्माधिरोहति ।
तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ २६ ॥

ततोऽपि शिशुनागानामाक्रन्दः श्रूयते महान् ।
क्रीडतां राम पम्पायां मतङ्गारण्यवासिनाम् ॥ २७ ॥

सिक्ता रुधिरधाराभिः संहृत्य परमद्विपाः ।
प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ २८ ॥

ते तत्र पीत्वा पानीयं विमलं शीतमव्ययम् ।
निवृत्ताः संविगाहन्ते वनानि वनगोचराः ॥ २९ ॥

राम तस्य तु शैलस्य महती शोभते गुहा ।
शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम् ॥ ३० ॥

तस्या गुहायाः प्राग्द्वारे महाञ्शीतोदको ह्रदः ।
बहुमूलफलो रम्यो नानानगसमावृतः ॥ ३१ ॥

तस्यां वसति सुग्रीवश्चतुर्भिः सह वानरैः ।
कदा चिच्छिखरे तस्य पर्वतस्यावतिष्ठते ॥ ३२ ॥

कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ।
स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥ ३३ ॥

तं तु खस्थं महाभागं कबन्धं रामलक्ष्मणौ ।
प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिकात् ॥ ३४ ॥

गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीच्च सः ।
सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ ३५ ॥

स तत्कबन्धः प्रतिपद्य रूपं
वृतः श्रिया भास्करतुल्यदेहः ।
निदर्शयन्राममवेक्ष्य खस्थः
सख्यं कुरुष्वेति तदाभ्युवाच ॥ ३६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com